# Shri Hanumatstotram

# શ્રી હનુમત્સ્તોત્રમ્

## Document Information

Text title : Shri Hanumatstotram

File name : hanumatstotramshrIdharasvAmI.itx

Category : hanumaana, shrIdharasvAmI, stotra, aShTaka

Location : doc_hanumaana

Author : Shridharasvami

Description/comments : shrIdharasvAmI stotraratnAkara

Acknowledge-Permission: Upendra Shripad Dasare, https://shridharamrut.com

Latest update : November 8, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 13, 2022

*sanskritdocuments.org*

# શ્રી હનુમત્સ્તોત્રમ્

(પ્રમાણિકા વૃત્તમ્)
સુખૈકધામ ભૂષણમ્ મનોજગર્વખણ્ડનમ્ ।
અનાત્મધીવિગર્હણમ્ ભજેષમઞ્જનીસુતમ્ ॥ ૧॥

ભવામ્બુધિં તિતીર્ષુભિઃ સુસેવ્યમાનમદ્ભુતમ્ ।
શિવાવતારિણં પરમ્ ભજેઽહમઞ્જનીસુતમ્ ॥ ૨॥

ગુણાકરં કૃપાકરમ્ સુશાન્તિદં યશસ્કરમ્ ।
નિજાત્મબુદ્ધિદાયકમ્ ભજેઽહમઞ્જનીસુતમ્ ॥ ૩॥

સદૈવ દુષ્ટભઞ્જનમ્ સદા સુધર્મવર્ધનમ્ ।
મુમુક્ષુભક્તરઞ્જનમ્ ભજેઽહમઞ્જનીસુતમ્ ॥ ૪॥

સુરામપાદસેવિનમ્ સુરામનામગાયિનમ્ ।
સુરામભક્તિદાયિનમ્ ભજેઽહમઞ્જનીસુતમ્ ॥ ૫॥

વિરક્તમણ્ડલાધિપમ્ સદાત્મવિત્સુસેવિતમ્ ।
સુભક્તવૃન્દવન્દિતમ્ ભજેઽહમઞ્જનીસુતમ્ ॥ ૬॥

વિમુક્તિ વિઘ્નનાશકમ્ વિમુક્તિ ભક્તિદાયકમ્ ।
મહાવિરક્તિકારકમ્ ભજેઽહમઞ્જનીસુતમ્ ॥ ૭॥

સુખંયદેવમદ્વયમ્ બૃહત્ત્વમેવ તત્ સ્વયમ્ ।
ઇતીહ બોધિકં ગુરુમ્ ભજેઽહમઞ્જનીસુતમ્ ॥ ૮॥

વિરક્તિમુક્તિદાયકમ્ ઇમં સ્તવં સુપાવનમ્ ।
પઠન્તિ યે સમાદરાત ન સંસરતિ તે ધ્રુવમ્ ॥ ૯॥

॥ ઇતિ શ્રીમત્ પરમહંસપરિવ્રાજકાચાર્ય સદ્ગુરુ ભગવતા
શ્રીધરસ્વામિના વિરચિતં શ્રીસમર્થરામદાસ સ્તોત્રં સમ્પૂર્ણમ્ ॥

*Shri Hanumatstotram*

pdf was typeset on November 13, 2022

Please send corrections to *sanskrit@cheerful.com*